वातपित्तहा । पथ्यात दोषशमनी निद्रापुष्टिकरी मता" उपाधिकमुदकं यत्र उदाहृतः गौरा० ङीष् स्वार्थे कन् वा ह्रस्वः । उपोदीकाप्यत्र स्त्री

**उपोद्ग्रह** पु० उप+उद्+ग्रह-अप् । ज्ञाने । "तस्मात् सुखमुपोद्ग्रहकृच्छति" श्रा०उ० । "उपोद्पूर्वकग्रहेः ज्ञानार्थत्वदर्शनात् तथार्थत्वम् ।

**उपोद्घातः** पु० समीपवर्त्तिनः प्रकृतस्य उद्घातः उद्धननम् ज्ञानं चिन्तनम् यत्र । उप+उद्+हन-गतौ गत्यर्थत्वात् ज्ञानार्थता आधारे घञ् । १प्रकृतसिद्ध्यर्थमालोचनात्मके सङ्गतिप्रभेदे । "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" अवसरशब्दे विवृतिः । २तदर्थवर्णने च । तत्त्वणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति" दीधि० ३प्रारम्भे च

**उपोद्दलन** न० उप+उत्+दुवल-ल्युट् । उद्दीपने उत्तेजने ।

**उपोषण** न० उप+उष-ल्युट् । उपवासे अहोरात्राभोजने । "प्राप्ते श्रीरामनवमीदिने मर्त्योविमूढधीः । उपोषणं न कुरुते कुम्भीपाके महीयते" । "उपोषणं नवम्याञ्च दशम्यामेव पारणम्" ति० त० अगस्त्यसं० । उपवासशब्दे विवृतिः । उपवासस्य उपदाहसाधनत्वात् तथात्वम् ।

**उपोषित** न० उप+वास+भावे-क्त । १उपवासे । "नास्ति स्त्रीणां पृथग्यज्ञः न व्रतं नाप्युपोषितम्" मनुः । कर्त्तरि क्त । २उपवासकर्त्तरि त्रि० । "उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्" दुर्गो० त०पु० ।

**उपोष्य** त्रि० उप+वस-अकर्मकधातुयोगे कालस्य कर्मसंज्ञा विधानात् कर्मणि वा०क्यप् । १उपवासेन यापनीये तिथ्यादौ । "त्रिसन्ध्यव्यापिनी या तु सैवोपोष्या सदा तिथिः" कालमा०पु० । उप+वस-ल्यप् । २उपवासं कृत्वेत्यर्थे अव्य० ।

**उप्त** त्रि० वप-क्त । १कृतवापे धान्यादौ अधिकरणे क्त । २उप्तधान्यादौ क्षेत्रे । "यव्वं वपेन तदभूदसदीय ! रिक्तं भवतन् कृतं कुचकराद्गमिवोप्तमृथाम्" माघ० । ३मुण्डिते च । "पर्य्युप्तशिरसमिति" पार० स्न० । परितव्वर्तोभावेन उप्तशिरसम् मुण्डितशिरसम्" हरिनाथः । भावे क्तिन् । उप्ति वपने स्त्री "वीजानामुप्तिविच्च स्यात्" मनुः ।

**उप्तकृष्ट** त्रि० पूर्व्वमुप्तं पश्चात् कृष्टं पूर्व्वकालेत्यादिना स० । वीजवपनानन्तरं कृष्टे क्षेत्रे (वीजाकृते क्षेत्रे) । (काड़ान)

**उप्त्रिम** त्रि० वप+क्त्रि मप् च । वपनजाते ।

**उप्य** त्रि० वप-वा० कर्मणि क्यप् । वपनीये व्रीह्यादौ "दीक्षितस्ये द्युपतप्येतोप्यानां येनेच्छेत् चिकित्सेत्" कात्या० २५,१३,२० । "उप्यानां व्रीहियवादीनाम्" कर्कः ।

**उब्ज** आर्जवे तुदा० पर० अक० सेट् । उब्जति औब्जीत् । णिचि उब्जयति ते औब्जिजत् त । "इन्द्राग्नीरक्ष उब्जतम्" ऋ० १,२१,५ । "उब्जन्तु तं सुभ्वः पर्व्वतासः" ६,५२,१ । घञ् नि० बस्य दः समुद्रः अभ्युद्रः । नि+उब्ज (उलटान) उत्तानस्यावतानकरणे न्युब्जति उत्तानं वस्तु अवतानं करोतीत्यर्थः ।

**उब्जक** त्रि० उब्ज-ण्वुल् । आर्जवयुक्ते । ततः तिका० फिञ् औब्जायनि तदपत्ये पुंस्त्री । तिककितवादित्वात् गोत्रप्रत्ययस्य बहुषु द्वन्द्वे लुक् । उब्जककुभाः ।

**उभ(म्भ)** पूर्त्तौ तुदा० प० सक० सेट् । उभति औभीत् । उवोभ । उम्भति उम्भीत् अयं मुचादिरिति कविकल्प० तन्मते औम्भत्" मोपधत्वात् नोपधालोपः उम्भाम् बभूव आस चकार । वेदे गणव्यत्ययः उनप्ति उम्नाति "दृढान्यौम्नादुशमानओजः" ऋ० ४,१६,४ । "इममुम्भं गा ये मानम् परिषन्तमद्रिम्" ऋ० ४,१,१५ । "सर्व्वमम्भम् काकुत्स्थमौम्भत्तीक्ष्णैः शिलीमुखैः" भट्टिः । पा० मते लुङि रूपम् । अन्यमते लुङि रूपम् ।

**उभ** त्रि० द्वि० । उन्द-गतौ-भक् । उभ-पूर्त्तौ क वा । द्वित्वविशिष्टे एकत्वापेक्षाबुद्ध्या प्रथमं द्वित्वस्यैव जननेन द्वित्वस्यैकत्वेन ज्ञानद्वारा गम्यमानत्वात् पूर्य्यमाणत्वाद्धोपचारात् तथात्वम् । "उभौ यदि व्योम्नि पृथक् पतेताम्" माघः । "उभावपि हि तौ धर्म्मौ सम्यगुक्तौ मनीषिभिः" "अक्षणा अवणावुभौ" "आचम्य प्रयतोनित्यमुभे सन्ध्ये समाहितः" मनुः । ततः वृत्तिमात्रे नित्यम् अयच् । "उभयपक्षविनीतनिद्राः" रघुः । उभयविधः, उभयथा उभयतः उभयत्र । अस्य सर्वादि० सर्व्वनामकार्य्यम् तेनास्य द्विवचनान्तत्वेन अन्यकार्य्याभावेऽपि टेरकच् । उभकौ नायच् । स्वार्थे तद्धितकनि तु अयच्प्रसङ्गः । ततः प्रथमापञ्चमी सप्तम्यर्थे तसिल् अयच् । उभयतस् । द्वाभ्यां द्वावित्यर्थे द्वयोरित्यर्थे च अव्य० "तज्ज्ञः पुनात्युभयतः पुरुषानेकविंशतिम्" याज्ञ० । "शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा" । "ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तीये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः" मनुः । प्रकारे थाल् अयच् । उभयथा द्विप्रकारार्थे अव्य० । "नैव नः प्रियतमोभयथासौ यद्यमुं न द्दृशते दृशते वा" नैष० । "विनाशे नाशे वा तव सति वियोगोऽप्युभयथा" ।